23-12-2020

साहित्यम् । शास्त्री

छन्दालङ्कारविवेचनम् ।

" प्रतिकूलतामुपगते हि विधौ, विफलत्वमेति बहुसाधनता ।
अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपि ॥"

अस्मिन् पद्ये प्रतिचरणं द्वादशाक्षराः सन्ति ।

पद्यस्य चरणे सगणादिक्रमः →

प्रतिकूलतामुपगते हि विधौ, विफलत्वमेति बहुसाधनता ।

।।ऽ, ।ऽ।, ।।ऽ, ।।ऽ, ।।ऽ, ।ऽ।, ।।ऽ, ।।ऽ,

सगण, जगण, सगण, सगण, सगण, जगण, सगण, सगण

अवलम्बनाय दिनभर्तुरभून् न पतिष्यतः करसहस्रमपि ॥

।।ऽ ।ऽ। ।।ऽ ।।ऽ ।।ऽ ।ऽ। ।।ऽ ।।ऽ

अथ द्वादशाक्षरस्या जगत्याः जात्याः भेदं प्रमिताक्षरा नामकं वृत्तं लक्षयति →

सगणजगणाभ्यां ततः सगणद्वयेन चेद् पादरचना, तदा "प्रमिताक्षरा" नाम कथिता पूर्वाचार्यैः ।

" प्रमिताक्षरा सजससैरुदिता ।"

अलङ्कारः → श्लेषः ।

" वाच्यभेदेन भिन्ना यद् युगपद्भाषणस्पृशः
श्लिष्यन्ति शब्दाः यत्र श्लेषोऽसौक्षरादिभिरष्टधा; । "

23-12-2020

डॉ० निर्मल कुमार झा, ( स० प्राचार्यः )
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ

23-12-2020

संस्कृतसामान्यम् । उपशास्त्री I

अनिवार्यपत्रम् ।

हिन्दीभाषायामनुवादं कुरुत ।

मंत्रिभ्यः मोदकं रोचते । देवेभ्यः शक्तिं रोचते ।
विप्रेभ्यः दक्षिणां देहि । महयं ज्ञानं देहि । साधवे
वस्त्रं देहि । दरिद्रेभ्यः भोजनं वस्त्रं च भवान् ददातु ।
ज्ञानिने महत्वं देहि । अहं गुरुजनेभ्यः महत्वं ददामि ।
नेत्रहीनाय नेत्रे रोचेते । गुरवे नमः । अग्नये स्वाहा ।
पितृभ्यः स्वधा । इन्द्राय वषट् । राजपुरुषः चोराय
कुप्यति । अध्यापकः छात्रेभ्यः क्रुध्यति ।
द्रुह्यन्ति पातकिनः साधवे । अलं हरिः दैत्येभ्यः ।
कृष्णं विना गोप्यः दुःखिताः सन्ति ।
देवैः सह दैत्यः आगमिष्यन्ति । अयं क्रोधेन क्रोधात्
वा कम्पते । मोहनस्य भ्राता रोगेन दुर्बलः अस्ति ।
चतुर्भिः वर्षैः सह व्याकरणमपठत् । मासेनागतं पत्रम् ।
यज्ञात् भवति पर्जन्यः । क्रोधात् भवति संमोहः ।
संमोहात् स्मृतिविभ्रमः । स्मृतिभ्रंशात् बुद्धिनाशः ।
बुद्धिनाशात् प्रणश्यन्ति जन्तवः ।

23-12-2020

डॉ॰ निर्मल कुमार झा, (स॰ प्राचार्य)
रा॰ उ॰ सं॰ महावि॰ सुखसेना, पूर्णियाँ ।

संस्कृतसामान्यम् । उपशास्त्री II 23-12-2020

अनिवार्यपत्रम् ।

शब्दरूपाणि ।

"राजन्" (राजा) पुल्लिङ्ग

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | राजा | राजानौ | राजानः |
| द्वितीया | राजानम् | ,, | राज्ञः |
| तृतीया | राज्ञा | राजभ्याम् | राजभिः |
| चतुर्थी | राज्ञे | ,, | राजभ्यः |
| पञ्चमी | राज्ञः | ,, | ,, |
| षष्ठी | ,, | राज्ञोः | राज्ञाम् |
| सप्तमी | राज्ञि, राजनि | ,, | राजसु |
| सम्बोधन | हे राजन् ! | हे राजानौ ! | हे राजानः ! |

युवन् (युवा, जवान) पुल्लिङ्ग

| | एकव० | द्विव० | बहुव० |
|---|---|---|---|
| प्रथमा | युवा | युवानौ | युवानः |
| द्वितीया | युवानम् | ,, | यूनः |
| तृतीया | यूना | युवभ्याम् | युवभिः |
| चतुर्थी | यूने | ,, | युवभ्यः |
| पञ्चमी | यूनः | ,, | ,, |
| षष्ठी | ,, | यूनोः | यूनाम् |
| सप्तमी | यूनि | ,, | युवसु |
| सम्बोधन | हे युवन् ! | हे युवानौ ! | हे युवानः ! |

23-12-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्य
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ